| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| लशुनपलाण्डुगृञ्जनभक्षणम्। रूपरसादिभिर्लशुनादितुल्य-द्रव्यभक्षणञ्च। | ज्ञानतश्चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात्८धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | अज्ञानात्तप्तकृच्छ्रम्। | पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः। | ११।० कार्षापणाः। | यथाशक्ति। |
| | चिरतराभ्यासे संवत्सरयावकपानम्। एतदुभयत्र पुनरुपनयनमपि शूद्राणामुपनयनतुल्यचान्द्रायणेन सह प्रकृतव्रतस्य पादः। | १५ धेनवः। | ४५ कार्षापणाः। | यथाशक्ति। |
| सजातीयमृतसूतकिनां पक्वान्नभक्षणम्। | ज्ञानतः प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | अज्ञानात् त्र्यहोपवासः। अभ्यासे द्वैगुण्यादिकम्। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| मृतसूतकिनां ब्राह्मणक्षत्रियवैश्यशूद्राणामामान्नस्य ब्राह्मणकर्तृकभक्षणम्। | विप्रस्यामान्ने प्राणायामः। क्षत्रियस्यामान्ने शतगायत्रीजपः। वैश्यस्यामान्ने पञ्चशतगायत्रीजपः। शूद्रस्यामान्ने अष्टसहस्रगायत्रीजपः। अभ्यासे द्वैगुण्यम्। | | | |
| मृतकिसूतकिजलपानम्। | ब्राह्मणस्य पञ्चगव्यं पीत्वा उपवासः। एतत् सकृदज्ञाने ज्ञाने तु द्वैगुण्यम्। अभ्यासे त्वावृत्तिः। तज्जलस्पर्शे स्नानमात्रम्। क्षत्रियादीनां पादपादहानिः। | ० | ॥० पणाः। | यथाशक्ति। |
| नवश्राद्धान्नभोजनम्। नवश्राद्धन्तु साग्नीनां चतुर्थपञ्चमनवमैकादशाहक्रियमाणं निरग्नीनान्तु आद्यश्राद्धमात्रम्। | चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात्८धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| प्रथममासिकश्राद्धान्नभोजनम्। | पराकः। | ५ धेनवः। | १५ कार्षापणाः। | यथाशक्ति। |
| त्रिपक्षे प्रेतश्राद्धान्नभोजनम्। | अतिकृच्छ्रम्। | ३ धेनवः। | ९ कार्षापणाः। | यथाशक्ति। |
| द्विमासादिषण्मासपर्य्यन्तं प्रेतश्राद्धान्नभोजनम्। | प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| षण्मासादूर्द्धमब्दपर्य्यन्तं प्रेतश्राद्धान्नभोजनम्। | पादकृच्छ्रम्। | ० | १ कार्षापणः। | यथाशक्ति। |
| पुनराब्दिकश्राद्धान्नभोजनं अर्थात् सपिण्डीकरणान्नभोजनम्। एतत् स्मार्त्तमतं शूलपाणिमते तु द्वितीयसांवत्सरिकान्नभोजनम्। | एकाहोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| पत्राद्यनन्तरितहस्तदत्तानां पक्वहस्तदत्तानां शूद्रादत्तानाज्यघृततैललवणव्यञ्जनपानीयपायसमाक्षिकफाणितगोरसशाकानां भक्षणम्। | द्वादशाहसाध्यसान्तपनम्। एतत् ज्ञानतः। अज्ञानादर्द्धम्। लौहपात्रेण परिवेशनेऽप्येतदेव प्रायश्चित्तं ज्ञेयम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः। | ० | १ कार्षापणः। | यथाशक्ति। |
| अकृतापोशानस्य अकृतमौनस्य च भोजनम्। | अष्टोत्तरशतगायत्रीजपः। एतद्द्विजानामनापद्विषयम्। | ० | ० | ० |
| अकृताचमनस्य पानभोजनम्। | अष्टोत्तरसहस्रगायत्रीजपः उपवासो वा। अभ्यासे द्विगुणादि। एतत् कटुकषायताम्बूलेक्षुव्यतिरिक्तभोजनविषयम्। | ० | ॥० पणाः। | यथाशक्ति। |